# શ્રીલક્ષ્મીનૃસિંહહૃદયસ્તોત્રમ્

Shri Lakshmi Nrisimha Hridaya Stotra

sanskritdocuments.org

August 13, 2019

# Shri Lakshmi Nrisimha Hridaya Stotra

# શ્રીલક્ષ્મીનૃસિંહહૃદયસ્તોત્રમ્

## Sanskrit Document Information

```
Text title : Shri Lakshmi Nrisimha Hridaya Stotra

File name : lakShmInRRisimhahRRidayastotram.itx

Category : vishhnu, hRidaya, lakshmI, dashAvatAra

Location : doc_vishhnu

Proofread by : NA, Sunder Hattangadi sunderh at hotmail.com

Latest update : August 13, 2019

Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 13, 2019

*sanskritdocuments.org*

Shri Lakshmi Nrisimha Hridaya Stotra

# શ્રીલક્ષ્મીનૃસિંહહૃદયસ્તોત્રમ્

અસ્ય શ્રીલક્ષ્મીનૃસિંહહૃદય મહામન્ત્રસ્ય પ્રહ્લાદ ઋષિઃ ।
શ્રીલક્ષ્મીનૃસિંહો દેવતા । અનુષ્ટુપ્છન્દઃ ।
મમ ઈપ્સિતાર્થસિદ્ધ્યર્થે પાઠે વિનિયોગઃ ॥

કરન્યાસઃ -
ૐ શ્રીલક્ષ્મીનૃસિંહાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ વજ્રનખાય તર્જનીભ્યાં નમઃ ।
ૐ મહારૂપાય મધ્યમાભ્યાં નમઃ ।
ૐ સર્વતોમુખાય અનામિકાભ્યાં નમઃ ।
ૐ ભીષણાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ વીરાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
હૃદયન્યાસઃ -
ૐ શ્રીલક્ષ્મીનૃસિંહાય હૃદયાય નમઃ ।
ૐ વજ્રનખાય શિરસે સ્વાહા ।
ૐ મહારૂપાય શિખાયૈ વષટ્ ।
ૐ સર્વતોમુખાય કવચાય હું ।
ૐ ભીષણાય નેત્રત્રયાય વૌષટ્ ।
ૐ વીરાય અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્ -
ૐ સત્યં જ્ઞાનેન્દ્રિયસુખં ક્ષીરામ્ભોનિધિ મધ્યગં
    યોગારૂઢં પ્રસન્નાસ્યં નાનાભરણભૂષિતમ્ ।
મહાચક્રં મહાવિષ્ણું ત્રિનેત્રં ચ પિનાકિનં
    શ્વેતાહિવાસં શ્વેતાઙ્ગં સૂર્યચન્દ્રાદિ પાર્શ્વગમ્ ॥

શ્રીનૃસિંહં સદા ધ્યાયેત્ કોટિસૂર્યસમપ્રભમ્ ॥

અથ મન્ત્રઃ -

ॐ નમો ભગવતે નરસિંહાય દેવાય નમઃ ॥

અથ હૃદયસ્તોત્રમ્ ।
શ્રીનૃસિંહઃ પરમ્બ્રહ્મ શ્રીનૃસિંહઃ પર શિવઃ ।
નૃસિંહઃ પરમો વિષ્ણુઃ નૃસિંહઃ સર્વદેવતા ॥ ૧॥

નૃશબ્દેનોચ્યતે જીવઃ સિંહશબ્દેન ચ સ્વરઃ ।
તયોરૈક્યં શ્ૃતિપ્રોક્તં યઃ પશ્યતિ સ પશ્યતિ ॥ ૨॥

નૃસિંહદેવ જાયન્તે લોકાઃ સ્થાવરજઙ્ગમાઃ ।
નૃસિંહેનૈવ જીવન્તિ નૃસિંહે પ્રવિશન્તિ ચ ॥ ૩॥

નૃસિંહો વિશ્વમુત્પાદ્ય પ્રવિશ્ય તદનન્તરમ્ ।
રાજભિક્ષુસ્વરૂપેણ નૃસિંહસ્ય સ્મરન્તિ યે ॥ ૪॥

નૃસિંહાત્ પરમં નાસ્તિ નૃસિંહં કુલદૈવતમ્ ।
નૃસિંહભક્તા યે લોકે તે જ્ઞાનિનમિતીરિતાઃ ॥ ૫॥

વિરક્તા દયયા યુક્તાઃ સર્વભૂતસમેક્ષણાઃ ।
ન્યસ્ત સંસાર યોગેન નૃસિંહં પ્રાપ્નુવન્તિ તે ॥ ૬॥

માહાત્મ્યં યસ્ય સર્વે અપિ વદન્તિ નિગમાગમાઃ ।
નૃસિંહઃ સર્વજગતાં કર્તા ભોક્તા ન ચાપરઃ ॥ ૭॥

નૃસિંહો જગતાં હેતુઃ બહિર્યાયા અવલમ્બનઃ ।
માયયા વેદિતાત્મા ચ સુદર્શનસમાક્ષરઃ ॥ ૮॥

વાસુદેવો મયાતીતો નારાયણસમપ્રભ ।
નિર્મલો નિરહઙ્કારો નિર્માલ્યો યો નિરઞ્જનઃ ॥ ૯॥

સર્વેશાં ચાપિ ભૂતાનાં હૃદયામ્ભોજવાસકઃ ।
અતિશ્રેષ્ઠઃ સદાનન્દો નિર્વિકારો મહામતિઃ ॥ ૧૦॥

ચરાચરસ્વરૂપી ચ ચરાચરનિયામકઃ ।
સર્વેશ્વરઃ સર્વકર્તા સર્વાત્મા સર્વગોચરઃ ॥ ૧૧॥

નૃસિંહ એવ યઃ સાક્ષાત્ પ્રત્યગાત્મા ન સંશયઃ ।
કેચિન્મૂઢા વદન્ત્યેવમવતારમનીશ્વરમ્ ॥ ૧૨॥

નૃસિંહ પરમાત્માનં સર્વભૂતનિવાસિનમ્ ।
તસ્ય દર્શનમાત્રેણ સૂર્યસ્યાલોકવદ્ભવેત્ ॥ ૧૩॥

સર્વં નૃસિંહ એવેતિ સઙ્ગ્રહાત્મા સુદુર્લભઃ ।
નારસિંહઃ પરં દૈવં નારસિંહો જગદ્ગુરુઃ ॥ ૧૪॥

નૃસિંહેતિ નૃસિંહેતિ પ્રભાતે યે પઠન્તિ ચ ।
તેષાં પ્રસન્નો ભગવાન્ મોક્ષં સમ્યક્ પ્રયચ્છતિ ॥ ૧૫॥

ૐકારેભ્યશ્ચ પૂતાત્મા ૐકારૈક પ્રબોધિતઃ ।
ૐકારો મન્ત્રરાજશ્ચ લોકે મોક્ષપ્રદાયકઃ ॥ ૧૬॥

નૃસિંહભક્તા યે લોકે નિર્ભયા નિર્વિકારકાઃ ।
તેશાં દર્શનમાત્રેણ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૭॥

સકારો જીવવાચી સ્યાદિકારઃ પરમેશ્વરઃ ।
હકારાકારયોરૈક્યં મહાવાક્યં તતો ભવેત્ ॥ ૧૮॥

ૐકારજા પ્રેતમુક્તિઃ કાશ્યાં મરણં તથા ।
નૃસિંહ સ્મરણાદેવ મુક્તિર્ભવતિ નાન્યથા ॥ ૧૯॥

તસ્માત્સર્વપ્રયત્નેન મન્ત્રરાજમિતિ ધ્રુવમ્ ।
સર્વેષાં ચાપિ વેદાનાં દેવતાનાં તથૈવ ચ ॥ ૨૦॥

સર્વેષાં ચાપિ શાસ્ત્રાણાં તાત્પર્યં નૃહરૌ હરૌ ।
શ્રીરામતાપનીયસ્ય ગોપાલસ્યાપિ તાપિનઃ ॥ ૨૧॥

નૃસિંહતાપનીયસ્ય કલાં નાર્હતિ શોડશીમ્ ।
શ્રીમન્ મન્ત્રમહારાજ નૃસિંહસ્ય પ્રસાદતઃ ॥ ૨૨॥

શ્રીનૃસિંહો નમસ્તુભ્યં શ્રીનૃસિંહઃ પ્રસીદ મે ।
નૃસિંહો ભગવાન્માતા શ્રીનૃસિંહઃ પિતા મમ ॥ ૨૩॥

નૃસિંહો મમ પુત્રશ્ચ નરકાત્ત્રાયતે યતઃ ।
સર્વદેવાત્મકો યશ્ચ નૃસિંહઃ પરિકીર્તિતઃ ॥ ૨૪॥

અશ્વમેધસહસ્રાણિ વા જપેય શતાનિ ચ ।
કાશી રામેશ્વરાદીનિ ફલાન્યપિ નિશમ્ય ચ ॥ ૨૫॥

યાવત્ફલં સમાપ્નોતિ તાવદાપ્નોતિ મન્ત્રતઃ ।
શણવત્યશ્ચ કરણી યાવતી તૃપ્તિરિષ્યતે ॥ ૨૬॥

પિતૃણાં તાવતી પ્રીતિઃ મન્ત્રરાજસ્ય જાયતે ।

અપુત્રસ્ય ગતિર્નાસ્તિ ઇતિ સ્મૃત્યા યદીરિતમ્ ॥ ૨૭॥

તત્તુ લક્ષ્મીનૃસિંહસ્ય ભક્તિમાત્રાવગોચરમ્ ।
સર્વાણિ તર્કમીમાંસા શાસ્ત્રાણિ પરિહાય વૈ ॥ ૨૮॥

નૃસિંહ સ્મરણાલ્લોકે તારકં ભવતારકમ્ ।
અપાર ભવવારાબ્ધૌ સતતં પતતાં નૃણામ્ ॥ ૨૯॥

નૃસિંહ મન્ત્રરાજોઽયં નાવિકો ભાષ્યતે બુધૈઃ ।
યમપાશેન બદ્ધાનાં પઙ્ગું વૈ તિષ્ઠતાં નૃણામ્ ॥ ૩૦॥

નૃસિંહ મન્ત્રરાજોઽયં ઋષયઃ પરિકીર્તિતઃ ।
ભવસર્પેણ દંષ્ટ્રાણાં વિવેકગત ચેતસામ્ ॥ ૩૧॥

નૃસિંહ મન્ત્રરાજોઽયં ગારુડોમન્ત્ર ઉચ્યતે ।
અજ્ઞાનતમસાં નૃણામન્ધવદ્ભ્રાન્તચક્ષુષામ્ ॥ ૩૨॥

નૃસિંહમન્ત્રરાજોઽયં પ્રયાસં પરિકીર્તિતઃ ।
તાપત્રયાગ્નિ દગ્ધાનાં છાયા સંશ્રયમિચ્છતામ્ ॥ ૩૩॥

નૃસિંહમન્ત્રરાજશ્ચ ભક્તમાનસપઞ્જરમ્ ।
નૃસિંહો ભાસ્કરો ભૂત્વા પ્રકાશયતિ મન્દિરમ્ ॥ ૩૪॥

વેદાન્તવન મધ્યસ્થા હરિણી મૃગ ઇષ્યતે ।
નૃસિંહ નીલમેઘસ્ય સન્દર્શન વિશેષતઃ ॥ ૩૫॥

મયૂરા ભક્તિમન્તશ્ચ નૃત્યન્તિ પ્રીતિપૂર્વકમ્ ।
અન્યત્ર નિર્ગતા વાલા માતરં પરિલોકય ॥ ૩૬॥

યથા યથા હિ તુષ્યન્તે નૃસિંહસ્યાવલોકનાત્ ।
શ્રીમન્ નૃસિંહ પાદાબ્જં નત્વારઙ્ગ પ્રવેશિતા ॥ ૩૭॥

મદીય બુદ્ધિવનિતા નટી નૃત્યતિ સુન્દરી ।
શ્રીમન્ નૃસિંહ પાદાબ્જ મધુપીત્વા મદોન્મદઃ ॥ ૩૮॥

મદીયા બુદ્ધિમાલોક્ય મૂઢા નિન્દન્તિ માધવમ્ ।
શ્રીમન્ નૃસિંહપાદાબ્જરેણું વિધિસુભક્ષણમ્ ॥ ૪૦॥

મદીયચિત્તહંસોઽયં મનોવશ્યં ન યાતિ મે ।
શ્રીનૃસિંહઃ પિતા મહ્યં માતા ચ નરકેસરી ॥ ૪૧॥

વર્તતે તાભુવૌ નિત્યં રૌવહં પરિયામિ વૈ ।
સત્યં સત્યં પુનઃ સત્યં નૃસિંહઃ શરણં મમ ॥ ૪૨॥

અહોભાગ્યં અહોભાગ્યં નારસિંહો ગતિર્મમ ।
શ્રીમન્ નૃસિંહ પાદાબ્જ દ્વન્દ્વં મે હૃદયે સદા ॥ ૪૩॥

વર્તતાં વર્તતાં નિત્યં દૃઢભક્તિં પ્રયચ્છ મે ।
નૃસિંહ તુષ્ટો ભક્તોઽયં ભુક્તિં મુક્તિં પ્રયચ્છતિ ॥ ૪૪॥

નૃસિંહહૃદયં યસ્તુ પઠેન્નિત્યં સમાહિતઃ ।
નૃસિંહત્વં સમાપ્નોતિ નૃસિંહઃ સંપ્રસીદતિ ॥ ૪૫॥

ત્રિસન્ધ્યં યઃ પઠેન્નિત્યં મન્દવારે વિષેશતઃ ।
રાજદ્વારે સભાસ્થાને સર્વત્ર વિજયી ભવેત્ ॥ ૪૬॥

યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ નિશ્ચિતમ્ ।
ઇહ લોકે શુભાન્ કામાન્ પરત્ર ચ પરાઙ્ગિતમ્ ॥ ૪૭॥

॥ ઇતિ ભવિષ્યોત્તરપુરાણે પ્રહ્લાદકથિતં
શ્રીલક્ષ્મીનૃસિંહહૃદયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sunder Hattangadi sunderh at hotmail.com

---

*Shri Lakshmi Nrisimha Hridaya Stotra*

pdf was typeset on August 13, 2019

Please send corrections to *sanskrit@cheerful.com*